# शब्दविमर्शः ।

(Dr.V.R.MANOJ, I. I. T. KANPUR)

## 2. स्पृहयालुः ।

आलुच्प्रत्ययान्तान् शब्दान् विवेचयामः। रघुवंशस्य चतुर्दशे सर्गे सीतापरित्यागप्रसङ्गे कालिदासः "स्पृहयालुः" इति प्रयुङ्क्ते।

"प्रजावती दोहदशंसिनी ते तपोवनेषु **स्पृहयालु**रेव।
स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनम्।।" इति (रघुवंशम् १४.४५)।

दोहदः = गर्भिणीमनोरथः, तच्छंसिनी ते प्रजावती = भ्रातृजाया, तपोवनेषु **स्पृहयालु**रेव = सस्पृहेव। 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' (पा.सू.३.२.१५८) इति सूत्रेण आलुच्प्रत्ययः। स त्वं रथी सन्। तद्व्यपदेशेन = दोहदमिषेण नेयां नेतव्यामेनां सीतां वाल्मीकेः पदं = स्थानं प्रापय्य = गमयित्वा त्यज। अर्थाद् गर्भिणीमनोरथपूरणव्याजेन तां वने वल्मीकेराश्रमप्रान्ते जहि इति भावः।४५। सीता खलु पूर्वमेव वल्मीकेराश्रमं प्रति जिगमिषुरास्त। सा चात्मनः स्पृहाम् = वाञ्छां स्वस्वामिने निवेदयामास।

रामायणकथामवलम्ब्य काव्यानि बहूनि अजायन्त। यथा कालिदासस्य रघुवंशम्। कुमारदासस्य जानकीहरणम्। क्षेमेन्द्रस्य रामायणमञ्जरी। धनञ्जयस्य राघवपाण्डवीयम्। हरदत्तसूरेः राघवनैषधीयम्। इत्यादीनि बहूनि काव्यानि। तेषां कवीनां लक्ष्यमपि भिन्नमेव अभासत। यथा धनञ्जयः रामायणकथां

महाभारतकथाञ्च नितरां वैदग्ध्येन योजितवान्। सीतारामयोरलौकिकं वृत्तं, नलदमयन्त्योरभौमसुन्दरकथाञ्चैकत्रीकृतवान् हरदत्तसूरिः। महाकविः भट्टिः अपि इममेव ग्रन्थराजमवलम्ब्य व्याकरणमधिजिगापयिषुः काव्यं रचयामास। तत्र भट्टिकाव्ये वर्षर्तुयापनानन्तरमपि स्वप्रतिज्ञापरिपालने मन्दौत्सुक्यं सुग्रीवं विज्ञाय रामो लक्ष्मणं चोदयति बालिप्राप्तं मार्गं तवापि भविष्यतीति तं वदेति _

"**स्पृहयालुं** कपिं स्त्रीभ्यो निद्रालुमदयालुवत्।

श्रद्धालुं भ्रामरं धारुं सद्रुमद्रौ वद द्रुतम्।। इति (भट्टिकाव्यम् ७.२१)।

स्त्रीभ्यः = नारीभ्यः, **स्पृहयालुं** = साधु स्पृहयन्तं, निद्रालुं = निद्राशीलं, अस्मत्कार्येऽनवधानाच्छयनीय एव सर्वदा स्त्रीभिः स्थितत्वादिति भावः। भ्रामरं = मधु, श्रद्धालुं = साधु अभिलषन्तं, अत एव धारुं = साधु पिबन्तं, मध्विति शेषः। अद्रौ = पर्वते, किष्किन्धायामित्यर्थः। सद्रुं = साधु सीदन्तं, कपिं सुग्रीवं, *(त्वं)* अदयालुवत् = अदयनशील इव, वद = ब्रूहि। अर्थात् स्त्रीभ्यः स्पृहयालुं = स्त्रीष्वासक्तचित्तमत एव प्रतिज्ञापरिपालने विह्वलन्तं सुग्रीवं स्मारयेति भावः। प्राग्वदत्रापि 'स्पृह ईप्सायाम्' (चुरा. १८७२) इत्यस्माद्धातोः 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' *(पा.सू.३.२.१५८)* इत्यालुच्प्रत्ययः। स्पृहयतेः प्रयोगे "स्पृहेरीप्सितः" *(पा.सू.१.४.३६)* इति ईप्सितस्य स्त्रीशब्दस्य सम्प्रदानत्वात् चतुर्थीविभक्तिरत्र विशेषः।

अरसिकः स्याद्यदि कश्चिद्विरक्तानामिदं काव्यं भर्तृहरेः इति वदन्। स खलु शब्दशास्त्रसागरपारदृश्वा महान् भर्तृहरिः वैराग्यकाव्यलेखनमिषा कामपि कामिनीसक्तचित्त एव विरागरहसि काव्यकामिनीवपुरालिलेखिषुरिव भाति _

“मातर्लक्ष्मि भजस्व कञ्चिदपरं मत्कांक्षिणी म स्म भू _

भोगेषु **<u>स्पृहयाल</u>**वो न हि वयं का निस्पृहाणामसि।

सद्यः स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृतै _

भिक्षावस्तुभिरेव सम्प्रति वयं वृत्तिं समीहामहे।। इति (वैराग्यशतकम् ३.६२)।

मातर्लक्ष्मि! अपरं कञ्चित् भजस्व। मत्कांक्षिणी मा स्म भूः। भोगेषु स्पृहयालवः तव वशे। निस्पृहाणां काऽसि? वयं सम्प्रति सद्यः स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृतैः भिक्षावस्तुभिः एव वृत्तिं समीहामहे” इति भावः।

।।**स्पृहयालुः**।।

*******